
एकादशः पाठः
११

# किं श्रेष्ठम्?

## शरीराङ्गानां परिचयः



# ११ किं श्रेष्ठम्?




एकदा शरीरस्य अङ्गानां मध्ये कलहः भवति। प्रत्येकम् अङ्गं कथयति - अहं श्रेष्ठम्, अहं श्रेष्ठम्। तदा किं किं भवति? आगच्छन्तु, वयं पश्यामः -




**मुखम्** → अहं मुखम् । जनाः मम द्वारा वदन्ति, खादन्ति, पिबन्ति च। अतः अहं श्रेष्ठम्।



**दन्ताः** → नहि नहि। वयं भोजनस्य चर्वणं कुर्मः। वयं मुखस्य शोभां वर्धयामः। अतः वयं श्रेष्ठाः।



**जिह्वा** → तथा नास्ति। मां विना भाषणं न भवति। अहं भोजनस्य रसास्वादनं करोमि। भोजनं मधुरम् अस्ति अथवा कटु अस्ति, इति अहम् एव वदामि। अतः अहं श्रेष्ठा।



**हस्तः** → भोः। भोजनस्य चर्वणं दन्ताः कुर्वन्ति, रसास्वादनं जिह्वा करोति, किन्तु भोजनं मुखे अहं स्थापयामि। शरीरस्य बहूनि कार्याणि अहं करोमि, अतः अहं श्रेष्ठः।



**उदरम्**

एवं नास्ति। हस्तः भोजनं मुखे स्थापयति, दन्ताः चर्वणं कुर्वन्ति, जिह्वा रसास्वादनं करोति; किन्तु भोजनस्य पाचनकार्यम् अहम् एव करोमि। तदा शरीरं पुष्टं भवति। अतः अहं श्रेष्ठम्।



**नेत्रम्**

तथा नास्ति। यदि अहम् आहारं न पश्यामि, तर्हि आहारस्य ज्ञानम् एव न भवति। अहं सर्वान् पदार्थान् पश्यामि, तेषां ज्ञानं करोमि। नेत्रं विना सुन्दरस्य दृश्यस्य दर्शनं न भवति। अतः अहं श्रेष्ठम्।



**पादः**

नैव नैव। अहं श्रेष्ठः अस्मि। अहं सम्पूर्णशरीरस्य भारं वहामि। पादयोः द्वारा जनाः गमनागमनं कुर्वन्ति।

एतेषां वार्तालापं मस्तिष्कः शृणोति। सः चिन्तयति – ''एतेषाम् अङ्गानां कलहः सम्यक् नास्ति। एतेषां कलहः शरीरस्य हानिं करोति।'' तदा मस्तिष्कः सर्वाणि अङ्गानि कथयति –

''भोः! शरीरस्य सर्वेषाम् अङ्गानां समानं महत्वम् अस्ति। यदि एकम् अपि अङ्गं कार्यं न करोति, तर्हि शरीरस्य कार्यं बाधितं भवति। अतः सर्वाणि श्रेष्ठानि सन्ति। परस्परं कलहः मास्तु।''

सर्वाणि अङ्गानि मस्तिष्कस्य कथनं श्रुत्वा कार्यरतानि भवन्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एकदा | एकस्मिन् समये | एक बार |
| कलहः | विवादः | झगड़ा |
| कथयति | वदति | कहता है |
| तदा | तस्मिन् समये | तब |
| मम | मे | मेरा |
| चर्वणम् | पेषणम् | चबाना |
| वर्धयामः | वर्धनं कुर्मः | बढ़ाते हैं |

| | | |
|---|---|---|
| रसास्वादनं | रसस्य आस्वादनम् | रस का आस्वादन |
| मधुरं | मिष्टम् | मीठा |
| कटु | रुचिविशेषः | कड़वा |
| दन्ताः | दशनाः | दाँत |
| जिह्वा | रसना | जीभ |
| स्थापयामि | स्थापनं करोमि | रखता हूँ |
| बहूनि | अनेकानि | अनेक |
| पाचनकार्यम् | पाचनस्य कार्यम् | पचाने का काम |
| पुष्टं | पुष्टियुक्तम् | मजबूत, मांसल |
| आहारम् | भोजनम् | भोजन |
| सर्वान् | सकलान् | सभी को |
| नैव | न | नहीं |
| गमनागमनम् | गमनम् आगमनं च | आना-जाना |
| वहामि | वहनं करोमि | वहन करता हूँ |
| वार्तालापम् | सम्भाषणम् | बातचीत को |
| समानम् | तुल्यम् | समान |
| बाधितम् | अवरुद्धम् | अवरुद्ध |
| मास्तु | न भवतु | न हो |
| श्रुत्वा | श्रवणं कृत्वा | सुनकर |
| कार्यरतानि | कार्ये संलग्नानि | कार्य में संलग्न |

## अभ्यासः

### १. उच्चारणं कुरुत -

| | | | |
|---|---|---|---|
| शरीरस्य | कलहः | आगच्छन्तु | चर्वणम् |
| वर्धयामः | रसास्वादनम् | जिह्वा | पाचनकार्यम् |
| दृश्यस्य | गमनागमनम् | मास्तु | शृण्वन्ति |

**२. एकपदेन उत्तरत –**

(क) कलहः केषां मध्ये भवति ?

(ख) दन्ताः कस्य चर्वणं कुर्वन्ति ?

(ग) मुखे भोजनं कः स्थापयति ?

(घ) पादयोः द्वारा जनाः किं कुर्वन्ति ?

(ङ) 'परस्परं कलहः मास्तु' इति कः कथयति ?

**३. शरीरस्य अङ्गानि तेषां कार्यैः सह सुमेलयत –**

| | शरीरस्य अङ्गानि | कार्याणि |
|---|---|---|
| (क) | मुखम् | दर्शनं करोति । |
| (ख) | जिह्वा | वदति, खादति पिबति च। |
| (ग) | नेत्रम् | भोजनस्य रसास्वादनं करोति। |
| (घ) | पादः | चर्वणं कुर्वन्ति। |
| (ङ) | दन्ताः | भारं वहति। |

**४. अधोलिखितान् वर्णान् उचितक्रमेण योजयित्वा अङ्गानां नामानि लिखत –**

| | | | | | |
|---|---|---|---|---|---|
| यथा – | वा | जि | ह् | | – जिह्वा |
| (क) | उ | म् | द | र | – .............................. |
| (ख) | म् | ने | त्र | | – .............................. |
| (ग) | टः | ला | ल | | – .............................. |
| (घ) | का | सि | ना | | – .............................. |
| (ङ) | पो | लः | क | | – .............................. |

**५. अधोलिखितानां पदानां सन्धिं/सन्धिविच्छेदं कुरुत –**

(क) वार्ता + आलापः – ..............................

(ख) रस + आस्वादनम् – ..............................

(ग) ............ + ............ – नास्ति

(घ) ............ + ............ – देवालयः

(ङ) गमन + आगमनम् – ..............................

**६. कोष्ठके प्रदत्तशब्दस्य समुचितं द्वितीयाविभक्तिरूपं प्रयुज्य वाक्यानि पूरयत -**

**यथा** - शिक्षकः बालकानां वार्तालापं (वार्तालापः) शृणोति।

(क) वयं विद्यालयस्य ........................ (शोभा) वर्धयामः।

(ख) श्रमिकः ........................ (भारः) वहति।

(ग) बुभुक्षितः जनः ........................ (आहारः) अन्विष्यति।

(घ) यूयं ........................ (खाद्यपदार्थाः) खादथ।

(ङ) माता गृहस्य सर्वाणि ........................ (कार्याणि) करोति।

**७. निर्दिष्टस्य अङ्गस्य चित्रनिर्माणं कुरुत -**

| | |
|---|---|
| **नेत्रम्** | **कर्णः** |
| **नासिका** | **दन्ताः** |
| **पादः** | **हस्तः** |

८. प्रदत्तशब्दानां द्वितीयाविभक्तेः रूपाणि लिखत -

| | शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| पुँल्लिङ्गे | बालक | - | बालकम् | बालकौ | बालकान् |
| | ग्रन्थ | - | ग्रन्थम् | ........................ | ........................ |
| | अध्यापक | - | ........................ | अध्यापकौ | ........................ |
| | विद्यालय | - | ........................ | ........................ | विद्यालयान् |
| स्त्रीलिङ्गे | बालिका | - | बालिकाम् | बालिके | बालिकाः |
| | लता | - | लताम् | ........................ | ........................ |
| | छात्रा | - | ........................ | छात्रे | ........................ |
| | क्रीडा | - | ........................ | ........................ | क्रीडाः |
| नपुंसकलिङ्गे | फल | - | फलम् | फले | फलानि |
| | पुस्तक | - | पुस्तकम् | ........................ | ........................ |
| | अङ्ग | - | ........................ | अङ्गे | ........................ |
| | कार्य | - | ........................ | ........................ | कार्याणि |

९. द्वितीयाविभक्ति-रूपाणि प्रयुज्य उदाहरणानुसारं वाक्यानि रचयत -

**बालकः**

| पाठ | पठति |
|---|---|
| पत्र | लिखति |
| श्लोक | वदति |
| नाटिका | पश्यति |
| रोटिका | खादति |
| वस्त्र | क्षालयति |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | बालकः पाठं पठति। | बालकः पाठौ पठति। | बालकः पाठान् पठति। |
| | .................... । | बालकः पत्रे लिखति। | .................... । |
| | .................... । | .................... । | बालकः श्लोकान् वदति। |
| | बालकः नाटिकां पश्यति। | .................... । | .................... । |
| | .................... । | बालकः रोटिके खादति। | .................... । |
| | .................... । | .................... । | बालकः वस्त्राणि क्षालयति। |

## योग्यता-विस्तारः

( १. ) अस्मिन् पाठे युष्माभिः शरीरस्य अङ्गानां नामानि पठितानि। अत्र दन्ताः भोजनरूपेण विविधानां **खाद्यपदार्थानां** चर्वणं कुर्वन्ति। आगच्छन्तु, वयं कतिपयानां खाद्यपदार्थानां नामानि जानीमः -

| संस्कृतशब्दः | हिन्दी अर्थ | संस्कृतशब्दः | हिन्दी अर्थ | संस्कृतशब्दः | हिन्दी अर्थ |
|---|---|---|---|---|---|
| रोटिका | रोटी | कृशरः | खिचड़ी | लप्सिका | लपसी |
| शाकम् | सब्जी | मिष्टान्नम् | मिठाई | पूरिका | पूड़ी |
| सूपः | दाल | रसगोलकम् | रसगुल्ला | माषगर्भिका | कचौरी |
| तेमनम् | कढी | कृष्णगोलकम् | गुलाब जामुन | यवागू | दलिया |
| पायसम् | खीर | राधेयम् | रायता | संयावः | हलवा |
| ओदनम् | चावल | मोदकम् | लड्डू | अपूपः | पुआ |

**फलानां नामानि**

| संस्कृतशब्दः | हिन्दी अर्थ | संस्कृतशब्दः | हिन्दी अर्थ |
|---|---|---|---|
| द्राक्षाफलम् | अंगूर | जम्बूफलम् | जामुन |
| दाडिमम् | अनार | आम्रम् | आम |
| नारङ्गम् | नारंगी | कलिङ्गम् | तरबूज |
| नारिकेलम् | नारियल | सेवम् | सेव |
| कदलीफलम् | केला | मधुकर्कटी | पपीता |

( २. ) **पश्यत, पठत अवगच्छत च** -



बालकः श्लोकं पठति।
श्लोकः - श्लोकम्



महिला रोटिकां पचति।
रोटिका - रोटिकाम्



बिडालः दुग्धं पिबति।
दुग्धम् - दुग्धम्

## ( ३. ) सर्वनामशब्दानां द्वितीयाविभक्ति-रूपाणि-

| | लिङ्गम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| तत् | पुँल्लिङ्गम् | तम् | तौ | तान् |
| | स्त्रीलिङ्गम् | ताम् | ते | ताः |
| | नपुंसकलिङ्गम् | तत् | ते | तानि |
| एतत् | पुँल्लिङ्गम् | एतम् | एतौ | एतान् |
| | स्त्रीलिङ्गम् | एताम् | एते | एताः |
| | नपुंसकलिङ्गम् | एतत् | एते | एतानि |
| किम् | पुँल्लिङ्गम् | कम् | कौ | कान् |
| | स्त्रीलिङ्गम् | काम् | के | काः |
| | नपुंसकलिङ्गम् | किम् | के | कानि |
| अस्मद् | ----- | माम् | आवाम् | अस्मान् |
| युष्मद् | ----- | त्वाम् | युवाम् | युष्मान् |

## ( ४. ) आगच्छन्तु, वयं खेलामः

### अङ्गस्पर्श-क्रीडा



**प्रथमं चरणम्** -सर्वे छात्राः मण्डलाकारे उपविशन्ति।
अध्यापकः अपि मण्डले एकत्र तिष्ठति।

अध्यापकः क्रमशः शरीरस्य अङ्गानां नामानि वदति, यथा- नेत्रम्, कर्णः, हस्तः इत्यादीनि। अङ्गस्य नामकथनेन सह अध्यापकः तस्य अङ्गस्य स्पर्शम् अपि करोति। अध्यापकः यस्य अङ्गस्य नाम वदति, छात्राः तस्य एव अङ्गस्य स्पर्शं कुर्वन्ति। छात्राः अङ्गस्पर्शेन सह अङ्गस्य नाम अपि उच्चारयन्ति। यः छात्रः अध्यापकेन निर्दिष्टस्य अङ्गस्य स्पर्शं न करोति, सः बाह्यः भवति।

**द्वितीयं चरणम्** - प्रारम्भे अध्यापकः छात्रान् सूचयति ''अहं यस्य अङ्गस्य नाम वदामि, यूयं तस्य एव अङ्गस्य स्पर्शं कुरुत।'' अस्मिन् चरणे अध्यापकः छात्रेषु भ्रमम् उत्पादयति। तदर्थम् अध्यापकः छात्रेषु यस्य अङ्गस्य नाम वदति, तस्य अङ्गस्य स्पर्शम् अकृत्वा अन्यत् अङ्गं स्पृशति। अस्मिन् समये छात्राः तस्य एव अङ्गस्य स्पर्शं कुर्वन्तु, यस्य नामकथनं अध्यापकः करोति। अत्र ध्यानं दातव्यं यत् अध्यापकः यत् अङ्गं स्पृशति, छात्रैः तस्य अङ्गस्य स्पर्शः न आवश्यकः। अस्मिन् विषये यः दोषम् आचरति, स बाह्यः भवति।